# अग्निपुराणस्य प्राशस्त्यम्

वाई.सुरेशः, आचार्यः, विवेकानन्दमहाविद्यालयः, भारतीयविद्याभवनम्, हैदराबादः

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।
पुराणं धर्मशास्त्रं च विद्याह्येताश्चतुर्दशा॥

चतुर्दशसु विद्यासु पुराणमेकं प्रथितं वर्तते। भारतीयसंस्कृतेः स्वरूपावबोधनार्थं पुराणानामध्ययनम् अत्यन्तावश्यकम्। अत एव विमर्शका वदन्ति पुराणानि भारतीयसंस्कृतेः **मेरुदण्डानि** इति।

### पुराणशब्दस्य व्युत्पत्तिः

**पुरा भवम्** इत्यर्थे **सायञ्चिरम्प्राह्णेप्रगेऽव्ययेभ्यष्ट्युटुलौ तुट् च**[1] इति सूत्रेण पुराणमिति पदं निष्पन्नम्। **पुरा नवं भवति**[2] इति पुराणं **यस्मात् पुराह्यनक्तीदं-पुराणं तेन तत् स्मृतम्**[3]। **निरुक्तस्य यो वेद सर्वपापैः प्रमुच्यते**[4] इति श्लोकेन पुरा अनति अर्थात् प्राचीनकालजीवनचरितमेव पुराणमिति। इत्यर्थात् यत् प्राचीनपरम्परां **पुरा परम्परां वष्टि पुराणं**[5] **तेन तत् स्मृतम्** इत्यनेन **पुरा परम्परां वाष्टि कामयते** इत्यर्थात् यत् प्राचीनपरम्परां विशदीकरोति तत् पुराणमिति।

### पुराणरचनाक्रमः

पुराणानि भगवता व्यासमहर्षिणा निगदितानि। तत्र तु पद्मपुराणं प्रथमं च प्राणीतवान्।

**ततोऽन्यानि पुरणानि कृत्वा षोडशतु क्रमात्**
**अष्टादशं भागवतं सारमाकृष्य सर्वतः**
**कृतवान् भगवान् व्यासः शुकमध्यापयत्स्वयम्**[5]

इति श्लोकप्रमाणेन पुराणानां रचयिता व्यास एवेति निश्चप्रचम्। अष्टादशपुराणानां कर्ता सत्यवतीसुतः भगवान् वेदव्यासः। कर्ताऽपि कृष्णद्वैपायन एव।

### पुराणलक्षणम्

**पञ्चलक्षणात्मकं पुराणमिति प्रसिद्धिः**
**सर्गश्च प्रतिसर्गश्च वंशोमन्वन्तराणि च।**
**वंशानुचरितं चेति पुराणं पञ्चलक्षणम्**[6]॥

इत्यत्र सर्गो नाम सृष्टिः, प्रतिसर्गो नाम प्रलयः, वंशो नाम **राज्ञां ब्रह्मप्रसूतानां वंशस्त्रैकालिकोऽन्वयः**[7] इत्यनेन ब्रह्मणा सृष्टानां राज्ञां भूतभविष्यत्वर्तमानकालिकस्य वंशस्य निरूपणमेव पुराणमिति। मन्वन्तरं नाम **मन्वन्तरं तु दिव्यानां युगानामेकसप्ततिः** इति। अत्र[8] पुराणेषु षोढा मन्वन्तरवर्णनं क्रियते अर्थात् मनुदेवमनुपुत्रइन्द्रसप्तर्षिभगवतांशावराणां वर्णनं क्रियते। वंशानुचरितं नाम **वंशानुचरितं तेषां वृत्तं वंशधराश्च ये** इत्यनेन यस्मिन्नुत्पन्नानां राज्ञां विशिष्टवर्णनं भवति तद्वंशानुचरितमिति कथ्यते।

### पुराणसंख्या

प्राचीनकालादारभ्य पुराणानां संख्या अष्टादशेति सप्रमाणितम्। तथैव सर्वेषु पुराणेषु प्रायः विषयोऽयं स्पष्टीकृतः। उदाहरणार्थम्-

**मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम्।**
**अनापलिङ्गकूस्कानि पुराणानि पृथक् पृथक्**[10]॥

इत्यनेन संक्षिप्तश्लोकेन अष्टादशपुराणानां नामानि स्पष्ट्यन्ते। क्रमेण अत्र उल्लिख्यन्ते च-

१. मत्स्यपुराणम् २. मार्कण्डेयपुराणम् ३. भागवतपुराणम्
४. भविष्यपुराणम् ५. ब्रह्मपुराणम् ६. ब्रह्मवैवर्तपुराणम्
७. ब्रह्माण्डपुराणम् ८. वामनपुराणम् ९. विष्णुपुराणम्
१०. वायुपुराणम् ११. वराहपुराणम् १२. अग्निपुराणम्
१३. नारदपुराणम् १४. पद्मपुराणम् १५. लिङ्गपुराणम्
१६. गरुडपुराणम् १७. कूर्मपुराणम् १८. स्कन्दपुराणम्

अष्टादशोपपुराणान्यपि सन्तीति प्रथा वर्तते। तेषां कर्ताऽपि कृष्णद्वैपायन एव।

### पुराणेषु अग्निपुराणस्य वैशिष्ट्यम्

समस्तविद्यानां भारतीयविज्ञानकोशत्वेन विश्वकोशत्वेन च पुराणमिदं निरुच्यते। इदञ्च पुराणं त्र्यशीत्युत्तरत्रिशताध्यायेषु अनेकप्रकारकसन्निवेशो निक्षिप्तः इति। **आग्नेये हि पुराणेऽस्मिन् सर्वाः विद्याः प्रदर्शिताः**[11]॥ इत्यनेन सुदृढं ज्ञायते। अर्थात् अवतारकथावर्णनं संक्षेपेण वर्णितम्। तथैव रामायणमहाभारतकथाः पर्याप्ततया विस्तारतया अग्निपुराणे उपवनिबद्धा। मन्दिरनिर्माणकला, प्रतिष्ठाविधानं च सूचकरूपेण निगदितम्। ज्यौतिषधर्मराजनीति-आयुर्वेदादिशास्त्राणां वर्णनं विस्ताररूपेण वर्णितम्। छन्दश्शास्त्रनिरूपणम् अष्टस्वध्यायेषु निरूपितम्। अलङ्कारशास्त्रास्य विवेचनं गहनतया विहितम्। व्याकरणशास्त्रस्य अनेके अंशाः प्रतिपादिताः। कोशविषया अपि अनेकेष्वध्यायेषु निरुक्ताः। एवं प्रकारेण अग्निपुरणपठनेन शब्दज्ञानं विशेषरूपेण अभिवर्धत इति निश्चप्रचम्, तथैव योगशास्त्रस्य यम-नियमादीनाम् अष्टाङ्गानां संक्षेपेण सुन्दरतया वर्णनं कृतम्। अन्ते अद्वैतवेदान्तसारस्य सङ्कलनमुपनिबद्धम्। एकत्र गीतासारांशोऽपि प्रस्तुतः। तथैव यमगीतापि सुन्दरतया निरूपितम्। एवं रीत्या अग्निपुराणस्य अनुशीलनेन अध्ययनेन समस्तज्ञानविज्ञानस्वरूपं लभ्यते।

इदञ्चाग्निपुराणं **वाशिष्ठायाग्निना प्रोक्तम्**[12] इत्यनेन स्वयमग्निनैव वशिष्ठाय प्रोक्तमिति ज्ञायते। अर्थात् प्रधानवक्ता तावद् अग्निरेव। तथैव अग्निपुराणे वक्तृश्रोतृपरम्परापि दृश्यते। मत्स्यपुराणप्रकारेण अग्निपुराणे १६,००० श्लोकाः वर्तन्ते। विद्यासारमिदं पुराणमिति कथ्यते। उदाहरणार्थम्-

**विष्णुः कालाग्निरुद्रोऽहं विद्यासारं वदामि ते।**
**विद्यासारं पुराणं यत्सर्वं सर्वस्य कारणम्॥**[13]

इत्यनेन समस्तविद्यासारं अग्निपुराणमिति जायते। इत्यनेन सर्वं अग्निपुराणं वेदमयं, ज्ञानमयमिति प्रोक्तम्।

### अन्यदुदाहरणम्

**वेदेषु च पुराणेषु यज्ञमूर्तिश्च गीयते।**
**आग्नेयाख्यं पुराणं तु रूपं विष्णोर्महत्तरम्॥**
**आग्नेयाख्यपुराणस्य कर्ता श्रोता जनार्दनः।**
**सर्वविद्यामयं पुण्यं सर्वज्ञानमयं महत्**[14]॥

इत्यनेन सर्ववेदमयं सर्वविद्यामयं सर्वज्ञानमयमिति अग्निपराणं प्रोक्तम्। अग्निपुराणे विषयक्रमः इत्थं समुपनिबद्धः।

**प्रश्नपूर्वं पुराणस्य कथा सर्वावतारजा**[15]
**सृष्टिप्रकरणं चाथ विष्णुपूजादिकं ततः।**
**अग्निकार्यं ततः पश्चान्मन्त्रमुद्रादिलक्षणम्।**
**सर्वदीक्षाविधानं च अभिषेकनिरूपणम्।**
**लक्षणं मण्डलादीनं कुशापामार्जनं ततः**
**पवित्रारोपणविधिर्देवालयविधिस्तथा।**
**शालग्रामादिपूजा च मूर्तिलक्षणं पृथक् पृथक्**
**न्यासादीनां विधानं च प्रतिष्ठापूर्तकाततः।**
**विनायकादिदीक्षणां विधिः ज्ञेयः ततः परम्।**
**प्रतिष्ठा सर्वदेवानां ब्रह्माण्डस्य निरूपणम्।**
**गङ्गादितीर्थमाहात्म्यं जम्ब्वादि द्वीपवर्णनम्**
**ऊर्ध्वाधोलोकरचना ज्योतिश्चक्र निरूपणम्**
**ज्यौतिषं च ततः प्रोक्तम् शास्त्रं युद्धनिरूपणम् जर्याणम्**
**षट्कर्म च ततः प्रोक्तं मन्त्रयन्त्रौषधीगणः**
**कुब्जिकादिसमर्चा च षोढान्यासविधिस्तथा**
**कोटिहोमविधानं च तदन्तरनिरूपणम्**
**ब्रह्मचर्यादिधर्मांश्च श्राद्धकल्पविधिस्ततः**
**गृभयज्ञस्ततः प्रोक्तो वैदिकस्मार्त कर्म च**
**प्रयश्चित्तानुकथनं तिथीनां च व्रतादिकम्**
**वारव्रतानुकथनं नक्षत्रव्रतकीर्तनम्**
**मासिकव्रतनिर्देशो दीपदानविधिस्तदा**
**नव व्यूहार्चनं प्रोक्तं नरकाणां निरूपणम्**
**व्रतानां चापि दानानां निरूपणमिहादितम्**
**नाडी चक्रसमुद्देशः सन्ध्याविधिरनुत्तमः**
**गायत्री अर्थस्य निर्देशो लिङ्गस्तोत्रं ततः परम्**
**राज्याभिशेक मन्त्रोक्ति धर्मकृत्यं च भूभुजाम्**
**स्वप्नाध्यायस्ततः प्रोक्तः शकुनादिनिरूपणम्**
**मण्डलादिकनिर्देशो रणदीक्षा विधिस्ततः**
**रामोक्तमिति निर्देशो रत्नानां लक्षणं ततः**
**धनुर्विद्या ततः प्रोक्ता व्यवहारप्रदर्शनम्**
**देवासरुविमर्दाख्य ह्यायुर्वेदनिरूपणम्**
**गजादीनां चिकित्सा च नानूपजास्ततः परम्**
**शान्तयश्चापि विविधाश्छन्दःशास्त्रमतःपरम्**
**साहित्यं च तः पश्चादेकार्णादिसमाह्वयाः**
**सिद्धशिष्टानुशिष्टश्च कोशः स्वर्गादिवर्गके।**
**प्रलयानां लक्षणं च शारीरकनिरूपणम्**
**वर्णनं परकाणां च योगशास्त्रमतः परम्**
**ब्रह्मज्ञानं ततः पश्चात् पुराणश्रवणे फलम्**
**एतदाग्नेयकं विपु पुराणं परिकीर्तितम्॥**

अग्निपुराणे समस्तविज्ञानं वर्तते। अत एव **आग्नेयं पठितं ध्यातं शुभं स्याद्भुक्तिमुक्तिदम्** इति निगदितं भारतीयसाहित्ये। अनेकप्रामाणिकग्रन्थसारभूतमिदं पुराणम्।

एवं प्रकारेण भारतीयसाहित्यसंस्कृतीनां सम्बद्धानां अनेकविषयानां संक्षिप्तसमाहारः अस्मिन्नग्निपुराणे दृश्यते। अस्य पुराणस्य अध्ययनेन प्राचीनभारतीयविज्ञानं सम्यक्परिचितं भवति। अत एव इदं भारतीयविज्ञानसर्वस्वमिति वर्ण्यते। तस्मात् कारणादेव **आग्नेये हि पुराणेऽस्मिन् सर्वाः विद्याः प्रदर्शिताः** इति उच्यते।

सन्दर्भसूची-

१. पाणिनीयाष्टाध्यायी ४.३.२३
२. यास्कनिरुक्तः ३-१९
३. वायुपुराणम् १.२०३
४. पद्मपुराणम् ५.२.५३
५. पद्मपुराणम्
६. अमरकोशः १.५
विष्णुपुराणम् ३.६.२४
अग्निपुराणम् १.१४
स्कन्दपुराणम् २.८४
शिवपुराणम् १.४९
ब्रह्मवैवर्तपुराणम् १३३.६
७. भागवतपुराणम् १२.७.१६
८. अमरकोशः १.४.२८
९. भागवतपुराणम् १२.७.१३
१०. देवीभागवतम् १.३.२१
११. अग्निपुराणम् ३८३.५२
१२. मत्स्यपुराणम् ५३.८०
१३. अग्निपुराणम् १.१३
१४. अग्निपुराणम् २७१.१६.२८
१५. नारदपुराणम् ९२-अध्यायाः